No. १०९६-घ

Title १-: रुद्रयामल तन्त्रे भवानी कवचम्
२-: वराह पुराणे सूर्य स्तोत्रम्

Author

Extent १+१=२ Age

Subject तन्त्र (१) | पुराण (२) (स्तो. भा.)

क भवानीकवचम्

ख सूर्यस्तोत्रम्

१०९५ २पत्रे

कटिदेशंतु नाभिं भर्गस्तथैवच देवस्य मेतु हृदयं धीमही कंठमेवच धियोमे
पातु नासाग्रं यःपदं चक्षुषी तथा लकारं नःपदं पातु मूर्धानं मे प्रचोदयात् तत्स
दं पातु मूर्धानं सपादः पातु बालकं चक्षुषी मे विकारश्च श्रोत्रं रक्षेत्तु कारकः ना
सापुटं वकारस्तु रेकारस्तु कपोलकं णिकारस्तूत्तरोष्ठंच अंकारस्त्वधरोष्ठकं
आस्यमध्ये भकारस्तु गकारश्चिबुकं तथा देकारः कंठदेशंतु वकारः स्कंददे
शकं स्यकारो दक्षहस्तंतु धीकारो वामहस्तकं मकारो हृदयं रक्षेद्धिकारो जठ
रं तथा धिकारो नाभिदेशंतु योकारस्तु कटिं तथा यकारो मे रक्षेद्गुह्यं नकारोवतु
मेढ्रकं प्रकारो जानुनी रक्षेज्जंघे चोकारकस्तथा दकारो गुल्फदेशंतु याकारश्च
पदद्वयं त्कारंतु कवचं पुण्यं बाधाशतविनाशनं चतुःषष्टिकलाविद्याविलासै।
श्वर्यसिद्धिदं जपारंभे च गायत्र्या जपांते कवचं पठेत् इति श्रीब्रह्माविष्णुमहेश्व
रप्रोक्तं गायत्रीकवचं संपूर्णं १७ ॥ ॥ ॐ नमो भवान्यै नमः श्रीदेव्युवाच ॐ
देवदेव जगन्नाथ त्रैलोक्याभयदायक भवान्याकवचं ब्रूहि त्रिषु लोकेषु दुर्लभं ॥
श्रीभैरवोवाच शृणु देवी प्रवक्ष्यामि भवानीकवचं परं विनामुना न सिद्धिः स्यात्सा
धकस्य महेश्वरी तस्माच्छृणु महादेवि कवचं परमाद्भुतं शृणुयात्पाठयेद्वापि प
ठेतयस्तु मानवः स प्राप्नोति धनं पुत्रान्नायुर्देव्याश्च दर्शनं ॐ अस्य श्री भवानी

भ० कवचमंत्रस्य श्रीभैरवऋषिः अनुष्टुप्छंदः श्रीभवानीदेवता श्रीभवानीप्रीत्यर्थे
३ जपेपाठेविनियोगः ॐ ह्रीं श्रीं मे शिरः पायाद्देवीक्षेमंकरीस[illegible]दा ललाटंपातु
3 मेलक्ष्मी नेत्रेमेपातुसुंदरी श्रुतीमेपातुभीरुंडा जया नासां सदावतु विजयापा
तुमेगंडौमुखंमेपातुचंडिका स्कंधौमेपातुचामुंडा कंठंमेरक्तदंतिका स्तनौमे
पातुवाग्देवी भुजौमेपातुकुब्जिका हृदयंपातुमेताराकुक्षिंमेपातुनारिणी पार्श्वौ
मेपातुमातंगी नाभिंमेतोतुलावतु शिश्नंमेपातुमुमुखी गुह्यंश्रीगुह्यकेश्वरी मेढ्रं
मेशारिकापातुकटिंमेपातुकालिका ऊरूमेपातुवाराहीजानुमेशारदावतु जंघे
महाबलापायाद्गुल्फौश्रीगुह्यकालिका पादौमेसततंपातुदेवीश्रीभद्रकालिका
पादस्तलंपादपृष्ठंपायान्मेत्रिपुरेश्वरी शिरसःपादपर्यंतंभवानीपातुमेवपुः।
विस्मारितंतुयत्स्थानेयत्स्थानेनामवर्जितं तत्सर्वंपातुमेदेवीभवानीभयनाशि
नी प्रभातेपातुमांशांतामध्याह्नेकालरात्रिकाः अपराह्नेमहामायारात्रौराज्ञी
सदावतु अर्धरात्रेजगन्मातानिशांतेबगुलामुखी राजराजेश्वरीवध्नंबोधंपा
तुनुमांशिवा व्रजंतंपातुमेदुर्गातिष्ठंतंपार्वतीतथा निषण्णंपातुमांनित्यंदेवी
त्रिपुरभैरवी रणेराजकुलेद्यूतेविवादेशत्रुसंसदि भूतप्रेतपिशाचेषुरक्षेन्मांप
रमेश्वरी इतीदंकवचंदिव्यंत्रिषुलोकेषुदुर्लभं यत्रतत्रनदृष्टव्यंयस्यकस्यनदेय ३

सू० ७

ह्लीं आद्या भवानी सर्वस्वं पुण्यं श्री पुण्यवर्द्धनं सर्वापरायशमनं कीर्त्तिपुत्रधनप्र
दं सकृदुच्चारमात्रेण भुक्तिमुक्तिफलप्रदं पठनाद्धारणात्सत्यं सर्वान्कामान्नरो ल
भेत् गोप्यं गुप्ततरं साक्षात्कलौ निर्वाणदायकं भवान्याः कवचं भक्त्या गोपनीयं
स्वयोनिवत् इति श्रीरुद्रयामले तन्त्रे भैरवसंवादे भवानीकवचं संपूर्णं २२ ॥ ॥
श्रीसूर्याय नमः ॐ सप्ताश्वरथमारूढो अरुणः सारथी समः श्वेतपद्मधरं देवं
तं सूर्यं प्रणमाम्यहं १ बंधूकपुष्पसंकाशं हारकुंडलभूषितं एकचक्रधरं देवं तं
सूर्यं० २ लोहितावर्णसंकाशं सर्वलोकपितामहं सर्वव्याधिहरं देवं तं सू० ३ ॥
तं देवं ईश्वरं शाकं ब्रह्माविष्णुमहेश्वरं परंब्रह्म परं ज्ञानं तं सूर्यं० ४ तं पृथ्वीआ
पतेजश्च वायुस्त्वाकाशमेव च सर्वेशं श्रीजगन्नाथं तं सूर्यं० ५ तं देवं लोककर्
त्तारं कीर्त्तिकारणशंकरं रुद्रतेजोधरं देवं तं सूर्यं० ६ अखंडमंडलाकारं जरा
जन्मविवर्जितं गगने लिंगमाराध्यं तं सूर्यं० ७ निर्मलं निर्विकल्पं च निर्विका
रो निरामयं जगत्कर्त्ता जगद्धर्त्ता तं सूर्यं० ८ सूर्यस्तोत्रं पठेन्नित्यं ग्रहपीडावि
नाशनं धनं धान्यं मनोवांछां श्रेयः प्राप्नोति नित्यशः ९ शिवरात्री सहस्राणि
कृत्वा जागरणं भवेत् तत्पुण्यं लभते सर्वं तत्फलं प्रणमाम्यहं १० अश्वमेधसह
स्राणि वाजपेयशतानि च कन्याकोटिसहस्राणि तत्फलं प्र० ११ गयायां पिंडदा
नेन पितॄणां च समुद्धरं दृष्ट्वा जागेश्वरं देवं तं० १२ अजेश्वरसमेपेतं सोमनाथं तथैव च
क्रिकृतो भावो पोषितं रविवासरे नव्याधिं चन वा कष्टं सूर्यलोके स गच्छति १६ इति श्रीवारा
पुराणे सूर्यस्तो[illegible]नारायणाय

४